पुरुषोत्तमस्थानि यथा,—
"मार्कण्डेये वटे कृष्णे रौहिणेये महोदधौ ।
इन्द्रद्युम्नसरः स्नात्वा पुनर्जन्म न विद्यते ॥"
इति तीर्थतत्त्वम् ॥ * ॥ अपि च । नाना-स्थानस्थानि यथा,—
"पृथिव्यां यानि तीर्थानि सर्व्वाण्येवाभिषेचनात् ।
तत्पञ्चतीर्थस्नानेन समं नास्त्यत्र संशयः ॥
एकादश्याञ्च विश्रान्तौ द्वादश्यां शौकरे तथा ।
त्रयोदश्यां नैमिषे च प्रयागे च चतुर्द्दशी ॥
कार्त्तिक्यां पुष्करे चैव कार्त्तिकस्य सितासिते ।
कालेष्वेषु नरः स्नात्वा सर्व्वं पापं व्यपोहति ॥"
इति वराहपुराणम् ॥

पञ्चत्वं, क्ली, (पञ्चानां क्षित्यादिभूतानां भावः ।) मरणम् । पञ्चानां भावः । इति हेमचन्द्रः ॥ ("पञ्चधासम्भृतः कायो यदि पञ्चत्वमागतः । पञ्चभिः स्वशरीरोत्थैस्तत्र का परिवेदना" ॥ तथा, भागवते । १ । १५ । ४१ ।
"मत्वावमानं सोत्सर्गं तं पञ्चत्वे ह्यजोहवीत् ॥")

पञ्चदशः, त्रि, पञ्चदशानां पूरणः । (पूरणे डट् । पञ्चाधिका दश यत्र वा ।) पोनेर इत्यादि भाषा । तत्संख्यामात्रवाचित्वे नान्तबहुवचनान्तोऽयम् । इति व्याकरणम् ॥ तद्वाचकशब्दः । (यथा, अथर्व्ववेदे । ११ । १ । १८ । "पितामहाः पितरः प्रजोपजाहं पक्ता पञ्चदशस्ते अस्मि ॥") तिथिः । इति कविकल्पलता ॥

पञ्चदशी, स्त्री, (पञ्चदशानां पूरणी । डट् । ङीप् ।) पूर्णिमा । अमावास्या । इति मेदिनी ॥ (यथाह याज्ञवल्क्यः । १ । १४६ ।
"पञ्चदश्यां चतुर्द्दश्यामष्टम्यां राहुसूतके ।
ऋतुसन्धिषु भुक्त्वा वा श्राद्धिकं प्रतिगृह्य च ॥"
(पञ्चदशप्रकरणानि सन्त्यस्याम् ।) श्रीमद्भारती-तीर्थविद्यारण्यमुनीश्वरकृतो वेदान्तग्रन्थविशेषः ॥

पञ्चदीर्घं, क्ली, (शरीरस्य स्मृतिशास्त्रोक्तलक्षणकपञ्चस्थले दीर्घं पञ्चसु अवयवेषु दीर्घलक्षणकमित्यर्थः ।) शरीरपञ्चावयवलक्षणविशेषः । यथा,—
"बाहू नेत्रद्वयं कुक्षिर्द्वे तु नासे तथैव च ।
स्तनयोरन्तरञ्चैव पञ्चदीर्घं प्रशस्यते ॥"
इति सामुद्रकम् ॥

पञ्चधा, व्य, (पञ्चन् + "संख्याया विधार्थे धा ।" ५ । ३ । ४२ । इति धा ।) पञ्चप्रकारम् । इति व्याकरणम् ॥ (यथा, भागवते । ८ । १९ । ३७ ।
"धर्म्माय यशसेऽर्थाय कामाय स्वजनाय च ।
पञ्चधा विभजन् वित्तमिहामुत्र च मोदते ॥")

पञ्चनखः, पुं, (पञ्च नखा यस्य ।) हस्ती । कूर्म्मः । इति हेमचन्द्रः ॥ व्याघ्रः । इति राजनिर्घण्टः ॥ * ॥ भक्षणीयपञ्चनखा यथा,—
"शशकः शल्लकी गोधा खड्गी कूर्म्मश्च पञ्चमः ॥"
इति स्मृतिः ॥
(तथाच याज्ञवल्क्यः । १ । १७७ ।
"भक्ष्याः पञ्चनखाः सेधागोधाकच्छपशल्लकाः ।
शशश्च मत्स्येष्वपि हि सिंहतुण्डकरोहिताः ॥")
"पञ्च पञ्चनखा भक्ष्या ये प्रोक्ताः कृतजैर्द्विजैः ।
कौशल्याज ! शशादीनां तेषां नैकोऽप्यहं कपिः ॥"
इति भट्टिः । ६ । १३१ ॥

पञ्चनदः, पुं, (पञ्च पञ्चसङ्ख्याकाः नद्यः सन्त्यत्र । समासे टच् ।) पञ्चनदीयुक्तदेशविशेषः । पञ्जाव इति पारस्यभाषा । तस्य नामान्तरम् । वाह्लीकः मद्रदेशश्च । ता नद्यो यथा । शतद्रुः १ विपाशा २ इरावती ३ चन्द्रभागा ४ वितस्ता ५ । इति पुराणम् ॥
(यथा, राजतरङ्गिण्याम् । ४ । २४८ ।
"रुद्धः पञ्चनदे जातु दुस्तरैः सिन्धुसङ्गमैः ॥") पञ्चानां नदीनां समाहारे क्ली ॥ (यथा, रामायणे । ३ । ४३ । २१ ।
"ततः पञ्चनदं कृत्स्नं विचेतव्यं समन्ततः ॥"
तच्च काशीस्थनदीपञ्चकरूपं तीर्थम् । यथा, काशीखण्डे । ५९ । ११३—११६ ।
"किरणाधूतपापे च तस्मिन् धर्म्मनदे शुभे ।
स्रवन्त्यौ पापसंहर्त्र्यौ वाराणस्यां शुभद्रवे ॥
ततो भागीरथी प्राप्ता तेन दिलीपिना सह ।
भागीरथी समायाता यमुना च सरस्वती ॥
किरणाधूतपापा च पुण्यतोया सरस्वती ।
गङ्गा च यमुना चैव पञ्चनद्योऽत्र कीर्त्तिताः ।
अतः पञ्चनदं नाम तीर्थं त्रैलोक्यविश्रुतम् ॥"
तीर्थविशेषः । यथा, महाभारते । ३ । ८२ । ७९ ।
"अथ पञ्चनदं गत्वा नियतो नियताशनः ।
पञ्चयज्ञानवाप्नोति क्रमशो येऽनुकीर्त्तिताः ॥"
असुरभेदः । यथा, हरिवंशे । १२० । ८८ ।
"हत्वा पञ्चनदं नाम नरकस्य महासुरम ॥")

पञ्चनिम्बं, क्ली, (पञ्चानां स्वीयपुष्पमूलादिरूपाणां निम्बानां समाहारः ।) निम्बवृक्षस्य-पत्रत्वक्पुष्पफलमूलानि । इति राजनिर्घण्टः ॥
"पञ्चनिम्बन्तु तत्पुष्पमूलवल्कफलच्छदैः ॥"
इति शब्दचन्द्रिका ॥

पञ्चनी, स्त्री, (पञ्च्यते प्रपञ्च्यते पाशक्रीडा-नियमो यत्र । पचि विस्तारे + ल्युट् स्त्रियां ङीप् ।) शारिशृङ्खला । इति शब्दरत्नावली ॥ (पाशार छक् इति भाषा ॥)

पञ्चनीराजनं, क्ली, पञ्चानां नीराजनानां समाहारः । पञ्चप्रकारारात्रिकम् । इति कालोत्तरतन्त्रम् ॥ अस्य विवरणं नीराजनशब्दे द्रष्टव्यम् ॥

पञ्चपक्षी, [न्] पुं, (अकारादि-ओकारान्ताः अइउएओरूपाः पञ्चस्वराः पक्षिणः पक्षिस्वरूपा यत्र ।) पारिभाषिकपक्षिपञ्चकद्वारा त्रिकालबोधकप्रश्नग्रन्थः । यथा,—
"प्रणम्य श्रीमहादेवं सर्व्वशास्त्रविशारदम् ।
भविष्यदर्थबोधाय पप्रच्छुर्मुनयो मुदा ॥
तेषां वचनमाकर्ण्य निजगाद महेश्वरः ।
त्रिकालज्ञानबोधार्थं पञ्चपक्षी प्रदर्श्यते ॥
अनेन शास्त्रसारेण लोकैः कालत्रयं प्रति ।
बलाबलानि दृश्यन्ते सर्व्वकार्य्येषु निश्चितः ॥
आगतं प्रच्छकं दृष्ट्वा दैवज्ञः सावधानतः ।
यद्यत् करोति कर्म्माणि तस्मात् सर्व्वं विचारयेत् ॥
ऊर्द्ध्वावलोकने जीवस्त्वधोदृष्टौ तु मूलकम् ।
समदृष्टौ भवेद्धातुरेताश्चिन्ताप्रभेदतः ॥"
तत्र ।
"ललाटे पुत्त्रचिन्ता स्यात् कामचिन्ता च कण्ठके ।
बाहुभ्यां वस्तुचिन्ता च व्याधिचिन्ता तथोदरे ॥
कटौ विच्छेदचिन्ता च शत्रुचिन्ता च गुह्यके ।
दुःखचिन्ता भवेत् पादे एते चिन्ताप्रभेदकाः ॥" * ॥
अपरञ्च ।
"अक्षरं पक्षिभुक्तञ्च दिग्दैवतदिनानि च ।
कालं वर्णं बलं मित्रं धातुमूलादिकं क्रमात् ॥
आरूढ़प्रश्नलग्नेभ्यः प्रथमाक्षरतोऽपि वा ।
प्रच्छकस्य वचः श्रुत्वा याह्यो वर्णः स्वरस्तथा ॥ * ॥
स्वरेण कल्पयेद्वारं वारात् पक्षी प्रजायते ।
पक्षिणो जायते वाक्यं वाक्याच्च फलसम्भवः ॥" * ॥
"अकारादिरोकारान्ताः स्वराः पञ्च प्रकीर्त्तिताः ।
भुक्त्यर्थं कल्पयेद्रूपं स्वरास्ते पक्षिरूपिणः ॥
अकारः श्येन आख्यात इकारः पिङ्गलस्तथा ।
उकारो वायसश्चैव एकारस्ताम्रशेखरः ।
ओकारो नीलकण्ठश्च स्वरास्ते पक्षिसंज्ञकाः ॥
अकारः पूर्व्वदिग्भागे इकारश्चैव दक्षिणे ।
उकारः पश्चिमे ज्ञेय एकारश्चोत्तरे तथा ॥
शेषस्थानेषु सर्व्वेषु ओकारस्तु प्रकीर्त्तितः ।
शकुनानां क्रियागत्या द्यूते युद्धे जयाजयौ ॥
प्राक् श्येनः पिङ्गलो याम्ये पश्चिमे काक उच्यते ।
उत्तरे ताम्रचूड़श्च कलापी मध्यगः स्मृतः ॥
ङञणाक्षरकैर्हीनान् ककारादींस्तु विन्यसेत् ।
अकारादिषु हान्तांस्तानेकैकं षट् परिक्रमात् ॥
अस्वरे कछडा वर्णा धभवाश्च भवन्ति हि ।
खजढा नमशा वर्णा इकारे परिकीर्त्तिताः ।
गझता: पयषा वर्णा उस्वरे स्युर्यथाक्रमम् ॥
घटथाः फरसा एते वर्णा एस्वरमात्रगाः ।
चठदा वलहा वर्णा ओस्वरे परिकीर्त्तिताः ॥ * ॥
प्रथमे रविभौमौ च द्वितीये चन्द्रचन्द्रजौ ।
तृतीये जीववारश्च चतुर्थे भृगुवासरः ॥
पञ्चमे मन्दवारश्च पक्षिणां क्रमशो लिखेत् ।
नन्दा भद्रा जया रिक्ता पूर्णा च तिथयः क्रमात् ॥
अकारे मेषसिंहालिः इः कन्यायुग्मकर्कटाः ।
उकारे चापमीनौ च एकारे च तुलावृषौ ॥
ओकारे मृगकुम्भौ च एवं राशिश्च संलिखेत ।
स्वराधः स्थापयेत् खेटान् राशयो यस्य नायकः ॥
अकारे सप्त ऋक्षाणि रेवत्यादिक्रमेण च ।
पञ्च पञ्च इकारादावेवन्दर्श स्वरोदये ॥ * ॥
प्रथमे चाश्विनी पूर्व्वं पञ्चनक्षत्रमुच्यते ।
अतः क्रमात् द्विषट् चैव पञ्च पञ्च च तारकाः ॥ *
स्वराणाञ्च क्रमेणैव देवताः परिकीर्त्तिताः ।
ईश्वरः पवनश्चैव इन्द्राकाशः सदाशिवः ॥ * ॥
प्राच्यां पृथ्वी गुरुश्चैव याम्यां शुक्रो जलं तथा ।
अङ्गारकः पश्चिमेऽग्निर्बुधो वायुस्तथोत्तरे ॥
सूर्य्यपुत्त्रस्तथाकाशे ऊर्द्ध्वमेवं लिखेत्ततः ।
क्षितौ ब्रह्मा जले विष्णुस्तथा रुद्रो हुताशने ॥
ईश्वरः पवने चैव तथाकाशे सदाशिवः ।
भूतो मयूरः कुजश्च कुक्कुटो वर्त्तमानकः ॥